# CS (MAIN) EXAM, 2010

Sl. No. 256

A-DTN-K-JM-17

# SANSKRIT

## (Compulsory)

*Time Allowed : Three Hours* | *Maximum Marks : 300*

## INSTRUCTIONS

*Candidates should attempt **ALL** questions. The number of marks carried by each question is indicated at the end of the question. Answers must be written in **Sanskrit** (Devanagari Script) unless otherwise directed. In the case of Question No. 3, marks will be deducted if the précis is much longer or shorter than the prescribed length. Précis should be attempted only on the special précis sheet provided.*

1. अधस्तनानामेकमधिकृत्यानुमानतः त्रीणि शतानि शब्दानवलम्ब्य एको निबन्धो लेखनीयः । 100

   (i) किं शासनं मानरक्षायै हिंसा अवरोद्धुं शक्नोति ?

   (ii) भक्ष्यपदार्थेषु सम्मिश्रण-संकटः ।

   (iii) अन्धविश्वास उत तर्काश्रितौचित्यम् ।

   (iv) शिक्षा सामाजिकपरिवर्तनञ्च ।

   (v) किं सूचनाया अधिकाराधिनियमः स्वच्छं न्यायपूर्णञ्च प्रशासनं सुनिश्चितकरणे क्षमः ?

(Contd.)

2. निम्नलिखितं गद्यांशं सावधानतया पठत, गद्यांशस्यान्ते च पृष्टानां प्रश्नानां स्पष्टतया, सम्यक्, संक्षिप्तभाषायाञ्चोत्तराणि प्रदेयानि । 6×10=60

सौर-ऊर्जा, यत्समस्तस्योर्जानिवीकरणस्यांशः पुरातनेन्धनेष्वस्माकमवलम्बनन्न्यूनीकर्त्तुमेकमात्रमाश्रयः । पुरातनानीन्धनानि कियत्कालानन्तरं महार्घानि विरलानि च भवितुमर्हन्ति । सौर-ऊर्जस उपयोगोऽस्माकं पृथ्वीग्रहस्य पर्यावरणीयं सन्तुलनं विद्यमानञ्च 'ग्रीन-हाउस' – प्रभावमूनीकर्त्तुमेक एवोपायः । सत्स्वपि सौर-ऊर्जस उपयोगिगुणेषु नास्याद्यावधि व्यापकस्तरे उपयोगः क्रियते, न च पुरातनेन्धनस्य विकल्परूपे एतत्स्वीक्रियते । एतदपि कारणमत्र यदस्य प्रक्रियाऽपेक्षयाऽधिकमूल्यवती । पुनरपि अस्य प्रक्रियायामुल्लेखयोग्यानि परिवर्तनानि आनीयन्ते येनास्या मूल्यं न्यूनं भविता, निश्चयेन च, भवतु मन्दगत्यैव, इदमेकं व्यवहार्यं विकल्पं विधास्यन्ति । सर्वकारेण प्रवर्तितं जवाहरलालनेहरू सौर-ऊर्जोऽभियानमस्यां दिशि एकं दूरदृष्टियुक्तं तथा चोर्जसः स्वच्छस्रोतप्राप्तेरेक आदर्शः प्रयासः ।

सौर-ऊर्जःक्षेत्रं जीविकोत्पादनदिशि आशासञ्चारं विदधाति । क्षेत्रमिदं शोधदिशि प्रक्रियायाश्च नूतनोद्भावनासु अतिव्ययं करोति, जीविकोत्पादनदिशि उच्चबौद्धिकपदानां सृष्टिं करोति ।

यद्यपि विद्युदुत्पादने भारतदेशो विश्वे षष्ठस्थाने वर्तते, पुनरपि भारते अधुनापि गहनविद्युत्संकटः । सौर-ऊर्ज एव विद्युत्संकटन्यूनीकरणे क्षमम् । एतत् सम्पूर्णपारिस्थितिकीयतन्त्रस्य गठनं विधास्यति ऊर्जसश्चोत्पादनक्षेत्रे आवश्यकताया वृद्धिं करिष्यति । अद्य अत्यधिकेष्टानि सौरक्षेत्रे पदानि सौर-ऊर्जायन्त्रस्थापनेऽभियन्त्रकीय-परिरूपविधेश्च क्षेत्रे सन्ति ।

अस्योद्योगस्य विकासाय एतदावश्यकं यन्नूतनकौशलवृद्ध्या उत्पादनमूल्यं न्यूनीकृत्य व्यापारान्तरमूल्यसन्तुलनेन मूल्यानि न्यूनानि भवेयुः ।

(i) अस्माभिः पुरातनेन्धनेषु अवलम्बनं कथं न्यूनीकरणीयम् ?

(ii) सौर-ऊर्जस उपयोगे के लाभाः सन्ति ?

(iii) किं कारणान्नाद्यावधि सौर-ऊर्जसः प्रयोगः लोकप्रियः सञ्जातः ?

(iv) सौर-ऊर्जसं सामान्यजनस्याधिगमक्षेत्रे आनेतुं किं किं विधीयते ?

(v) अस्माकं युवभ्य उच्चपदानि सौर-ऊर्जःक्षेत्रं कथं प्रदातुं शक्नोति ?

(vi) केन प्रकारेण सौर-ऊर्जा न्यूनमूल्यवत्कर्त्तुं शक्यते ?

**3.** अधस्तनगद्यांशस्य संक्षेपः मूलगद्यभागस्य तृतीयांश एव लेखनीयः। शीर्षकबिषये परामर्शो नावश्यकः। निर्धारितशब्दसीम्नि लेखनेऽसाफल्ये अङ्कक्षतिरावश्यकी। संक्षेपणं एतदर्थं पृथग्रूपेण प्रदत्त-प्रपत्रेष्वेव कार्यम्, अनन्तरञ्च सम्यग्रूपेण उत्तरपुस्तिकया सम्बद्धं करणीयम्। 60

यदि कला प्रत्येकं युगविशेषमभिव्यनक्ति तदा निश्चयेन तया विगतयुगस्य सीमावर्तिनो दूरे क्षेपणीयाः, पुरातन-कल्पनानामवधिं मानसिकञ्च विधानं पृथक्करणीयम्। जीवनमेकं सततं प्रवाहः। तस्य गतिः क्रान्तिप्रक्रियासु तीव्रा भवति यदा परिवर्तनानि तीव्राणि सम्पूर्णरूपे च भवन्ति। एतादृशे युगे सामाजिक्य आवश्यकता अग्रगामिसांस्कृतिक-प्रवृत्तिषु बलाधानं कुर्वन्ति — एकधा पुरातनमूलानि

शिथिलीकुर्वत्यो या स्वपुरातनप्रारूप-नवोत्पन्नयोश्च मध्ये द्वन्द्वमेकं सृजति। प्राचीनसंस्कृतेः समर्थकाः परिवर्तनाद् भीताः यथाशक्ति पूर्वस्थितिं कर्तुं प्रयतन्ते, स्वान् च ते नैतिकमूल्यानां सभ्यतायाश्च संरक्षकान् घोषयन्ति तथा चाऽनागतं प्रत्येकं प्रवाहमपसारयन्ति। परिवर्तनस्य समर्थका नैतद् वाञ्छन्ति ते पुरातनमानकानान्नियमानाञ्चावज्ञां कुर्वन्ति। सामाजिक-परिवर्तनस्य प्रत्येकमाकृतिः एकं सांस्कृतिकं प्रारूपमभिलषति, या च स्वावश्यकताः स्वयं व्यनक्ति, यथा पुरातनी, या विगतयुगस्य कृतिरासीद्, अधुना नूतनशक्तेः नूतनप्रणाल्याश्चोपयोगेऽक्षमा, स्ववस्तुधारणायाञ्च नूतनादर्शान् न प्रतिबिम्बयितुं समर्था, सन्दर्भेऽस्मिन् पुरातनसंस्कृतेः समर्थकाः असांस्कृतिकान् मार्गान् क्रूरानपि अवलम्बन्ते, यान् एकदा ते स्वयमेवोपेक्षितवन्तो भर्त्सितवन्तश्च। यदा काऽपि शक्तिः प्रगतिशीला भवितुमक्षमा, सा विनाशिनी सम्पद्यते। नूतन-समाज एव संस्कृतेर्विज्ञानस्य च प्रत्येकशाखायां रचनाकाराय सम्पूर्णविकासार्थमवसरान् प्रदातुं क्षमः।

अद्य समाजस्याव्यवस्थितत्वात् जीवनस्य संश्लेषणं छिन्नं जातं, यस्मिन् प्रत्येकशाखाया गतिविधिः परस्पराद् असंलग्ना, दार्शनिको वैज्ञानिकात्पृथग्भूतः, कलाविशारदा अभियन्तृभ्यः, एकः सर्वे चाविभक्तजीवनस्य महतः स्पन्दमान-संकुलात्पृथग्भूताः, यदा च प्रत्येकं सन्तुलनं सौन्दर्यस्य पूर्णतायाश्च रेखाङ्कान् परस्परं युनक्ति। उदाहरणार्थम् – अधुना यन्त्राण्यपि रूढगणितीयरेखाङ्केषु विषादयुक्तस्य वायोः धूम्रस्य च अचेतना आवेगहीनाश्च जनकाः न स्वीक्रियन्ते, ते सामान्येनाधस्तनभूमिवद् उपरितनव्योमवच्च उरीक्रियन्ते, यथा पुरागाथासु नैपुण्यस्य जीवतश्च गतिमन्ति नायकत्वपूर्णानि च

वृत्तानि स्वीक्रियन्ते। यन्त्राणि अद्य मानवाङ्गानां अतिरिक्तावयवा इव। ते कथयन्ति यन्मानवो निसर्गे स्वाधिपत्यं स्थापितवान्; इयं तस्य तत्त्वेषु विजयाभिमान-गाथा वर्तते। अयं संघर्षो मानवयावदेव पुरातनः। अयं संघर्षः परिपूर्णसौन्दर्येण, लयेन, संगीतेन, वर्णैश्चाप्लावितोऽस्ति।

यदि च मानवः स्वदुर्बलतया यन्त्राणि स्वोपरि प्रभुत्वकरणायाज्ञप्तवान्, नैष यन्त्रदोषः, यन्मनुष्येण स्वयमेव निर्मितम्, तेनैव निर्मितन्नाश्यते च। परनिन्दाया इयं बुभुक्षा स्वयं मानवमपि कवलीकुर्यात्। रेडियोयन्त्रं केवलं मानवस्य फुफ्फुसस्य ध्वनिविस्तारकयन्त्रं, दूरभाषयन्त्रं च तस्य कर्णयोः। वायुयाने कोपकरणं, ध्वनिं कुर्वतो वृषवाहनस्य च गायनं नैष कवित्वन्यायः। इयं पारम्परिकी साम्प्रदायिकता एव केवलम्। हलमप्येकदा युगान्तकारी आविष्कार एव आसीद् यथा अद्यत्वे 'ट्रैक्टर'-यन्त्रम्। नवोपकरणनिर्माणस्य मानवस्य अक्षय-प्रतिभाया उपेक्षाकरणं सामाजिकपरिवर्त्तनानां नियमाना-मुपेक्षणम्। कोऽपि यथार्थकलाकृत् नैतादृशमुपेक्षणं कर्तुं क्षमते। ''एकः कलाकृत् जैविकं प्रयोजनमिवोत्पादयति'' — एवं किल मनुते ख्यातो मैक्सिकोवासी कलाकृत् रिवेरा डियागोमहोदयः। यथा ''एको वृक्षः फलानि पुष्पाणि चोत्पादयति, वर्षपर्यन्तं विगतानां पत्राणां कृते न विलपति, जानन्नेतद् यन्नवीने ऋतौ तत् पुनः पुष्पाणि फलानि चोत्पादयिष्यति''। कला न केवलं वर्तमानं चित्रयति, अपितु यत्सम्भाव्यते भाविनि, न सामान्येन मिश्रिताशङ्काः, न केवलं निराशाजनकान् पराजयान्, अपितु रूपान्तरितकारिणीः सम्भावना अभिव्यनक्ति।

4. निम्नगद्यांशस्य संस्कृतभाषायामनुवादः करणीयः । 20

The world does not need extraordinarily talented people. It does not need highly skilled people either. It has plenty of super-intelligent people. We need ordinary people with extraordinary motivation. M K Gandhi was an ordinary man with amazing motivation to establish truth and justice. The Wright brothers were ordinary people with a dream of flying.

You can also achieve exceptional results if you are inspired with a higher ideal. Replacing 'inspiration' with 'information' has led to knowledge being viewed as drudgery rather than as pleasure. Education has degenerated to data being transmitted from teacher to the taught without igniting the minds of the young with a higher purpose.

How many of us wake up inspired, looking forward to a day of service ? Who among us finds exhilaration in contributing to society ? Life changes magically from boredom to excitement when you are inspired to serve. You redefine norms and achieve the impossible, paving the way to outstanding success. You find happiness at work, not in escaping from it. Most importantly, you evolve spiritually and attain Godhood.

Inspiration gives ordinary people the courage and hope to make life better for themselves and for the posterity. Find inspiration and life will transform into an exciting adventure of self-discovery.

5. निम्नलिखितसंस्कृतगद्यांशस्य आंग्लभाषायामनुवादः क्रियताम् । 20

अद्याहं विज्ञानस्य सामाजिकदायित्वानि विवेचयन् तानि वस्तून्यपि विवेचयिष्यामि यानि युवभ्यः वृद्धजनापेक्षया सरलानि ग्रहणे। एतस्य कारणमस्ति यद् युवानो गुणेनैकेन सम्पन्नाः, यः सामान्यरूपे कतिपयसंवत्सरानन्तरं शिथिलीभवति। स चास्ति कल्पनाशीलताया गुणः। कल्पनाशीलता एतादृशो गुणः यः विज्ञानस्यापरिहार्यो भागः नैसर्गिकरूपे च युवभ्यः प्रदत्तोऽस्ति। एतदेव दुःखप्रदं यद् वर्धमानेन वयसा एष गुणः शुष्यति। पुनरपि एष गुणः अद्यतनीयायास्माकं संसाराय प्रचुरमात्रायामपेक्ष्यते।

गतत्रिशतवर्षेभ्यो विज्ञानस्याविष्कारा: समाजे स्वप्रभावं प्रदर्शयन्ति, परं सामान्येन जना नैतद्विचारितवन्तः यदस्मद्विश्वं कथं प्रभावितमभूत्, न तेऽस्य कृते किमप्यौत्सुक्यमपि प्रदर्शितवन्तः। न्यूटनमहोदयस्य कालात् मानवा इदं ज्ञातवन्तो यत्प्रौद्योगिक्या प्रचुराणि सुखानि लाभाश्चावाप्तुं शक्यन्ते, या च वैज्ञानिकानुसन्धानेष्वाश्रिता। तदा मानवा ज्ञातुमारब्धवन्तो यद्विज्ञानस्य संसर्गाज्जातेभ्य औषधेभ्यो दीर्घायुरवाप्तुं शक्यते।

लियोनार्दो-द-विंसीमहोदयस्य कालान्मानवा इदमसासिषुर्यद् विज्ञानं युद्धेषु विजयप्राप्तेः भौतिकः सहचरो भवितुं शक्यते। यथा यथा वर्षाणि व्यतीतानि एकः प्रौद्योगिको भौतिकवादो विकसितः, नवप्रौद्योगिकज्ञानस्य पृच्छा तीव्रात् तीव्रतरा जाता, जनानामधिकांशः वैज्ञानिकः शिल्पकलाविशेषज्ञश्च भवितुमारब्धः।

6. (क) अधोलिखितानां शब्दानां स्वरचितवाक्येषु प्रयोगं कुरुत 20

(i) अपि

(ii) अक्षरम्

(iii) कति

(iv) सर्वथा

(v) पितरौ

(vi) गत्वा

(vii) हरये

(viii) यूयम्

(ix) क्व

(x) याति

(ख) अधोलिखितानि वाक्यानि शुद्धीकरणीयानि : 20

(i) रामो क्रीडति।

(ii) मां दुग्धं देहि।

(iii) लक्ष्मणः रामस्य सह आयातः।

(iv) त्वां नमः।

(v) वृक्षेण पत्रं पतति।

(vi) गोः पयः दोग्धि।

(vii) अहमासने उपविशामि।

(viii) भवान् क्व गच्छसि ?

(ix) मम नामः कृष्णः।

(x) तव गृहः कुत्रास्ति ?

---